स्वर्णजयन्तीवर्षम् 2019-20

श्रीमद्भट्टोजीदीक्षितप्रणीतः

# शब्दकौस्तुभः

## प्रथमो भागः

सम्पादकौ

विन्ध्येश्वरीप्रसाद द्विवेदी, गणपतिशास्त्री मोकाटे च

केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

# ŚABDA KAUSTUBHA

## OF

## ŚRĪ BHAṬṬOJĪ DĪKṢITA

## VOL. I


Edited by

**VINDHYESHWARI PRASAD DVIVEDI**

and

**GANAPATI SHĀSTRI MOKATE**



**Central Sanskrit University**

**Established by an Act of Parliament**

(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)

**Under Ministry of Human Resource Development, Government of India**

# भूमिका

अथैष शब्दकौस्तुभविषये प्रसङ्गात् कश्चन उदन्तविशेषः प्रकाश्यते—

तत्र स्वाध्यायोऽध्येतव्य इति विधिबोधितं वेदाध्ययनम्, ते च साङ्गा अध्येतव्या इति शिक्षादिपर्यालोचनेन स्पष्टं प्रतीयते—'तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते' इति। वेदाङ्गेषु मुखमिव प्रधानमिदं व्याकरणम्, 'तेषु च इन्द्रचन्द्रादिभेदेन अष्टधा भिन्नेषु महेश्वरप्रसादलब्धमिदं सर्वानतिशय्य वर्तमानमध्ययनाध्यापनाभ्यां सर्वत्र प्रसृतं सूत्रजालं 'दर्भपवित्रपाणिराचार्यः प्राङ्मुख उपविश्य महता प्रयत्नेन प्रणयति स्मेति तत्र २ आकरे भगवता अधिगतयाथातथ्येन विदितवेदितव्येन पतञ्जलिना प्रतिपादितम्'।

न खलु कश्चिदस्य पाणिनीयतन्त्रस्य सर्वशास्त्रोपकारकत्वे विप्रतिपन्नः नापि वेदाङ्गत्वे महेश्वरोपदिष्टाक्षरसमाम्नायापरपर्यायश्रुतिमूलकत्वात्।

गोनर्ददेशे भगवतः पाणिनेराचार्यस्याऽञ्जलौ यतोऽयं सन्ध्याकरणसमये पतितः, अतश्च पतञ्जलिरिति अभिधानमापन्नस्तत्रभवान् भुजगपतिरेव तद्रूपेणावतीर्णस्तपःप्रभावादिदं सूत्रजातं व्याख्यानेन समलञ्चकार। कस्को न जानात्यस्य जगतीतले आसेतुशीताचलं प्रथितस्य तपोविशेषस्य महिमातिशयम्, निखिलशब्दधर्मिकसाधुत्वप्रकारकयथार्थज्ञानवान् स एष योगाचार्यः, यदुक्तिजाते इदानींन्तनानामपि श्रुतितुल्यः समादरः। तत्प्रणीतो नितरामेष गम्भीरतरो भाष्याब्धिः। तत्सारमादित्सुना भट्टोजीदीक्षितेन बहुतरायाससहिष्णुना तत्रोपजायमानं श्रमातिशयमविगणय्य विष्णुनेव समुन्मथ्य भाष्योदधिं ततः समुद्धृतमिदं शब्दकौस्तुभो नाम ग्रन्थरत्नम्। अत्र च काशिकादितः महाभाष्यस्य गूढाभिप्रायवर्णने पूर्वोत्तरग्रन्थविरोधपरिहारे च ग्रन्थकर्तुः सातिशयोऽभिनिवेशो दरीदृश्यते। ग्रन्थप्रणयनकौशलं च विदुषां लोचनपथगोचरीभूतममन्दानन्दसन्दोहं जनयिष्यति इत्यत्र नास्तिसन्देहावसरः, सदवेक्षणस्यैव तन्निवर्तकत्वात्।

निखिलविद्यासंभारभासुरः पदवाक्यप्रमाणपारावारपारीणः श्रीमान् भट्टोजिदीक्षितः कदा कतमं देशमध्युवासेत्यादिकं यद्यपि बहुभिर्निर्णीतम्, अथाप्येतस्य द्राविडपञ्चकातिरिक्तत्वे न कमपि दृढतरं हेतुमुत्पश्यामः। प्रत्युत पृथ्वीमण्डलमौलिमण्डनमणेः काशीस्थस्य महाराष्ट्रज्ञातिसमुद्भूतस्य शेषोपाभिधस्य श्रीकृष्णपन्तस्यान्तेवासी इति।

"निर्विशेषमहं शेषाच्छेषकृष्णं गुरुं भजे।
योमामशेषाः शेषोक्तीर्विशिष्यैवाध्यजीगपत्॥ १॥

इति प्राचीनतरे गवर्नमेण्ट संस्कृतकालेज्सरस्वतीभवनस्थिते शब्दकौस्तुभपुस्तके उपलम्भात्

वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा॥
भट्टोजीदीक्षितमहं पितृव्यं नौमि सिद्धये॥

इत्यनेन रंगोजीभट्टस्य भ्राता इति वैयाकरणभूषणे कोण्डभट्टेन स्फुटं प्रतिपादितत्वात् स्वरवैदिकयोर्भागयोर्मध्ये विशेषेण ऋक्शाखोदाहरणदानाच्च तस्य द्राविडपञ्चकान्तर्भूतता दाक्षिणात्यता ऋक्शाखीयता च अस्मत्संमता॥ "शेणवई इति प्रसिद्धा काचन जातिरधुनापि दाक्षिणात्येषु वर्तमाना गौडसारस्वतापरपर्याया उपलभ्यते तस्यामेव जनिरेतेषां तेन गौडसारस्वतत्वं दाक्षिणात्यता ऋक्शाखीयता चेति सर्वमुपपद्यते

॥ श्रीः ॥

# शब्दकौस्तुभनवाह्निकविषयसूची


१ विषयनिरूपणम् १–३
२ स्थानिनां बोधकत्वमादेशानां वेति निरूपणम् ४–६
३ स्फोटनिरूपणम् ७–१०
४ व्याकरणाध्ययनप्रयोजनम् १०–११
५ व्याकरणाध्ययनफलम् ११–१८
६ फलकथनस्यावश्यकत्वम् १९
७ साधुत्वनिरूपणम् १९–२१
८ जातिव्यक्त्योर्वाच्यत्वनिरूपणम् २१–२३
९ नियमपरिसंख्याविचारः २३–२५
१० अपशब्दानां वाचकत्वविचारः २५
११ साधुशब्दप्रयोगाद्धर्मोत्पत्तिः २६–२८
१२ वर्णसमाम्नायप्रयोजनम् २८–३०
१३ अक्षरसमाम्नाये सन्ध्यभावः ३०–३२
१४ अकारस्य विवृतत्वसंवृतत्वविचारः। ३२–३५
१५ वर्णेषु जातिव्यक्तिपक्षौ ३५–३८
१६ लृकारोपदेशप्रयोजनम् ३८–४२
१७ अर्धेकारअर्धौकारखण्डनम् ४२–४४
१८ सन्ध्यक्षरेषु तपरोपदेशखण्डनम् ४४–४७
१९ तपरसूत्रे पंचमीतत्पुरुषविचारः ४७–४८
२० वर्णैकदेशस्य वर्णग्रहणेनाग्रहणम् ४८–५०
२१ हकारग्रहणप्रयोजनम् ५०–५३
२२ अयोगवाहानामक्षरसमाम्नाये उपदेशः ५३–५७
२३ अनुबन्धानां प्रत्याहारेषूपयोगः ५८–६६
२४ वृद्धिसंज्ञासूत्रम् ६६–७७
२५ इक्परिभाषासूत्रम् ७७–९३
२६ गुणवृद्धिनिषेधसूत्रम् ९४–१०९
२७ संयोगसंज्ञासूत्रम् १०९–१११
२८ अनुनासिकसंज्ञासूत्रम् ११२–११५
२९ सवर्णसंज्ञासूत्रम् ११५–१२०
३० सवर्णसंज्ञाप्रतिषेधसूत्रम् १२०–१२४
३१ प्रगृह्यसंज्ञासूत्रम् १२४–१४१
३२ घुसंज्ञासूत्रम् १४१–१४६
३३ अतिदेशसूत्रम् १४६–१४८
३४ संख्यासंज्ञाप्रकरणम् १४८–१५१
३५ षट्संज्ञा ,, ,, १५१–१५४
३६ निष्ठासंज्ञा ,, ,, १५४–१५५
३७ सर्वनामसंज्ञासूत्रम् १५६–१७१
३८ सर्वनामसंज्ञाप्रतिषेधसूत्रम् १७१–१७३
३९ अव्ययसंज्ञाप्रकरणम् १७३–१८३
४० सर्वनामस्थानसंज्ञासूत्रम् १८३–१८४
४१ विभाषासंज्ञासूत्रम् १८४–१८६
४२ संप्रसारणसंज्ञासूत्रम् १८८–१८९
४३ आगमादेशप्रकरणम् १८९–१९१
४४ आदेशनियामकप्रकरणम् १९१–१९२
४५ अन्तरतमपरिभाषाप्रकरणम् १९२–१९६
४६ रपरादेशनियामकसूत्रम् १९६–१९९
४७ सर्वादेशनियामकसूत्रम् २०१
४८ अतिदेशसूत्रम् २०२–२३३
४९ अतिदेशनिषेधसूत्रम् २३३–२५५
५० लुगादिसंज्ञासूत्रम् २५६–२५९
५१ प्रत्ययलक्षणसूत्रम् २५९–२६२
५२ प्रत्ययलक्षणनिषेधसूत्रम् २६२–२७०
५३ उपधासंज्ञासूत्रम् २७०–२७२
५४ तस्मादिति परिभाषासूत्रम् २७३–२७६
५५ शब्दस्य स्वरूपबोधकसूत्रम् २७७–२७८
५६ सवर्णग्राहकसूत्रम् २७८–२८१
५७ तपरस्य समकालसंज्ञासूत्रम् २८१–२८४
५८ अणादिसंज्ञासाधकसूत्रम् २८४–२८५
५९ तदन्तसंज्ञासूत्रम् २८५–२९५
६० वृद्धसंज्ञासूत्रम् २९५–२९८


इति ।

न्यतः श्रुतं कार्यित्वं बाध्यते । यथा 'ब्राह्मणा भोज्यन्तां, माठरकौण्डिन्यौ परिवेविषाताम्', इति विशेषतः श्रुतेन परिवेषणेन माठरकौण्डिन्ययोः सामान्यतः प्राप्तं भोजनं बाध्यते, तद्वत् । यद्यपीह लक्ष्यव्यक्तिभेदेनोभयं सम्भवति, सत्यपि सम्भवे सामान्यतः प्राप्तं विशेषप्राप्तेन बाध्यते इत्यभ्युपगमान्न दोषः । एवञ्च "अचो रहाभ्याम्" ( पा० सू० ८-४-४६ ) इति सूत्रे यर इति रेफभिन्नपरमेवेति स्थिते "अनचि च" (पा०सू०८-४-४७) इत्यत्रापि तथैव अर्थाधिकाराश्रयणात् । तेन 'हर्य्यनुभवः' इत्यादावपि रेफस्य न द्वित्वम् । नन्वेवं दध्युदकादौ यण् न स्यात, विशेषतः श्रुतेन स्थानित्वेनेकां निमित्तत्वस्य बाधादिति चेत्? न, तत्र लक्ष्यानुरोधेन व्यक्तिपक्षाश्रयणात् । व्यक्तिपक्षे हि प्रतिलक्ष्यमसकृल्लक्षणं प्रवर्त्तते । यद्वा, प्रतिलक्ष्यं भिन्नानां सर्वेषां लक्षणानां तन्त्रेणोच्चारणम् "इको यणचि" (पा सू०६-१-७७) इति । ततश्चेकामपि तात्पर्यतो निमित्तत्वप्रतिपादनाददोषः । नचैवं 'श्रीशः' इत्यादावपि यण्प्रसङ्गः, व्यक्तिपक्षे विप्रतिषेधे परमेवेति नियमबलेन तद्व्यक्तिविषयकशास्त्रस्यैव विरहकल्पनात् । एवमपवादविषयेऽपि 'सुश्रियौ' इत्यादौ बोध्यम् । "परिहृत्यापवादविषयं तत उत्सर्गो ऽभिनिविशते" इति न्यायात् । जातिव्यक्तिपक्षौ च लक्ष्यानुरोधाद्व्यवस्थयाऽऽश्रीयेते इति पस्पशायामेवोक्तम् । "तस्मादित्युत्तरस्य" (पा०सू०१-१-६७) "पत्युत्तरपदाण्ण्यः" (पा०सू०प०४-१-८५) इत्यादिनिर्देशाश्चेह लिङ्गम् । भाष्ये तु "नेमौ रहौ कार्यिणौ द्विर्वचनस्य, किं तर्हि निमित्तमिमौ" इत्युक्तम् । तत्र हकारग्रहणं दृष्टान्तार्थं, तस्य यर्बहिर्भूततया यथा न द्वित्वे कार्यिता तथा यरन्तर्भूतस्यापि रेफस्येति । एवमनुनासिकपरसवर्णविधी अपि स्थानेन्तरतमपरिभाषासंस्कृतौ स्थानप्रयत्नोभयान्तरतमे 'एतन्मुरारिः' 'त्वङ्करोषि' इत्यादौ क्वचिल्लब्धावकाशौ अनन्तरतमे प्रागुक्ते न प्रवर्त्तेते जातिपक्षाश्रयणादेवेति संक्षेपः । अत्र वार्त्तिकम्—"अयोगवाहानामट्सु णत्वं, शर्षु जश्भावषत्वे, अविशेषेण संयोगोपधसंज्ञाऽलोन्त्यविधिद्विर्वचनस्थानिवत्त्वनिषेधाः" इति । अस्यार्थः—अविद्यमानो योगः प्रत्याहारेषु सम्बन्धो येषां तेऽयोगाः अनुपदिष्टत्वादुपदिष्टैरगृहीतत्वाच्च प्रत्याहारसम्बन्धशून्या इत्यर्थः । वाहयन्ति निर्वाहयन्ति प्रयोगमिति वाहाः, अयोगाश्च ते वाहाश्चेति कर्मधारयः । अनुपदिष्टत्वे उपदिष्टैरगृहीतत्वे च सति श्रूयमाणा इत्यर्थः । "ते च विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमाः" इति भाष्यम् । एतच्च "ॠति ॠ वा" (का०वा०) "ॡति ॡ वा" (का०वा०) इति विहितयोरीषत्स्पृष्टयोरत्यु-

स्वर्णजयन्तीवर्षम् 2019-20

श्रीमद्भट्टोजीदीक्षितप्रणीतः

# शब्दकौस्तुभः

## द्वितीयो भागः

सम्पादकौ
विन्ध्येश्वरीप्रसाद द्विवेदी, गणपतिशास्त्री मोकाटे च

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

श्रीमद्भट्टोजीदीक्षितप्रणीत:

# शब्दकौस्तुभ:

## द्वितीयो भाग:

सम्पादकौ

विन्ध्येश्वरीप्रसाद द्विवेदी, गणपतिशास्त्री मोकाटे च

केन्द्रीयसंस्कृतविश्वविद्यालय:

संसद: अधिनियमेन स्थापित:

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालय:)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीन:

च मुक्तसंशयम्" (का०वा०) इति वार्त्तिकं दृष्ट्वा नानार्था एवेत्युदाहरणामिति भ्राम्यन्तः परास्ताः। न च पदार्थतावच्छेदकभेदाभावात् 'घटौ' इत्यादौ द्वन्द्वप्रसक्तिर्नेति वाच्यम्। "चार्थे द्वन्द्वः" (अष्टा०सू० २-२-२९) इति सूत्रेण साहित्यमात्रे द्वन्द्वविधानात्। तस्य चेतरेतरयोगद्वन्द्वे एकशेषे च विशेषणत्वं प्रयोगोपाधित्वं वा। समाहारद्वन्द्वे तु प्राधान्येन भानमित्यन्यदेतत्। न चैवमपि 'घटकलशौ' इत्यादिद्वन्द्वापत्तिः। "विरूपाणामपि समानार्थानाम्" (का० वा०) इति वार्त्तिकेन एकशेषात्। वस्तुतस्तु सौत्र एवायमर्थः। रूप्यते बोध्यते इति रूपम्, अर्थः समानं रूपं येषामिति सरूपाः। "ज्योतिर्जनपद" (अष्टा०सू० ६-३-८५) इति समानस्य सभावः। सरूपाश्च सरूपाश्च तेषामिति एकशेषेण व्याख्यानात्। न च स्वाङ्गे स्वव्यापारायोगः वाक्यापरिसमाप्तिन्यायादिति वाच्यम्। उद्देश्यतावच्छेदकरूपाक्रान्ततया "तुल्यास्यप्रयत्नम्" [अष्टा०सू० १-१-९] इतिवत्स्वस्मिन्नपि प्रवृत्तेः। एतद्विषयविवेचनं तु "अइउण्" (मा०सू० १) इत्यत्रैव कृतम्। अत एव जननीवाचिनो मातृशब्दस्य धान्यमापवाचिनस्तृजन्तस्य च एकशेषं निषेद्धुं प्रवृत्ते "मातृमात्रोः प्रतिषेधः सरूपत्वात्" (का० वा०) इति वार्त्तिके स्वान्तर्गते मातृमात्रोरित्यत्रापि निषेधप्रवृत्तिः। नन्वर्थविशेषोपहितयोरेव तत्राऽनुवादः। अन्यथा जननीवाचिनोरपि निषेधापत्तेः। तत्कथं शब्दरूपपरे स्वान्तर्गते निषेधप्रवृत्तिरिति चेत्, "प्रकृतिवदनुकरणम्" इत्यतिदेशादिति गृहाण। सूत्रमतेतु सरसूत्रादेवकारोऽत्राऽनुकृष्यते। तेन एकविभक्तौ यानि सरूपाण्येवेति व्याख्यानात्परिच्छेतृवाचिनश्च "अप्तृन्"(अष्टा०सू०६-४-११)इति सर्वनामस्थाने दीर्घविधानादसारूप्यादेकशेषाभावः। न च वाचनिकैकशेषविरहेऽपि श्लिष्टरूपकस्थल इव तन्त्रन्यायाश्रयेण पाक्षिक एकशेषो मातृमात्रोः स्यादेवेति वाच्यम्। यान्येकविभक्तौ सरूपाण्येव तेषामेवैकशेष इति नियमात्। न चैवं 'घटघटौ' इति पाक्षिकं दुर्वारमिति वाच्यम्। तन्त्रावृत्त्याद्याश्रयणेन सरूपाणामेकशेष एवेत्यपरनियमाश्रयणात्। तस्मात 'घटकुम्भौ' 'कुम्भकुम्भौ' 'मातृभ्यां' चेति पाक्षिकमनिष्टत्रितयं प्राप्तं सूत्रेणाऽनेन वार्यते। 'घटौ' इत्यादिसिद्धिस्तु स्यादेवैतद्विनापि हि। जातिपक्षे व्यक्तिपक्षेऽपीति निष्कर्षसंग्रहः। स्यादेतत्—देवदेव इत्यादावपि तर्ह्येकशेषः प्राप्नोति। न च 'एकविभक्तौ' इत्यनेन तद्वारणम्। तस्य सारूप्योपलक्षणत्वादेकशेषस्य चानैमित्तिकत्वात्। अथ वक्ष्यमाणरीत्या एकशेषविशेषणतां ब्रूषे तथाप्यनिस्तारः। देवदेव इत्यत्रापि

स्वर्णजयन्तीवर्षम् 2019-20

श्रीमद्भट्टोजीदीक्षितप्रणीतः

# शब्दकौस्तुभः

## तृतीयो भागः

सम्पादकौ

विन्ध्येश्वरीप्रसाद द्विवेदी, गणपतिशास्त्री मोकाटे च

केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

श्रीगणेशाय नमः ।

—:०:—

# शब्दकौस्तुभे

## चतुर्थाध्याये प्रथमे पादे प्रथममाह्निकम् ।

ङ्याप्प्रातिपदिकात् ॥ १ ॥

आ पञ्चमाध्यायसमाप्तेरधिकारोऽयम् । यद्यपि परश्चेत्युक्तेः पूर्वमाक्षिप्यमाणं प्रत्ययार्थान्वययोग्यार्थाभिधाय्येव योग्यतया लभ्यते तथाप्यसत्यस्मिन्नधिकारे वाक्यादपि क्यप्रत्ययादयः स्युः । ततो विशिष्टस्य प्रातिपदिकतायां सकलसुब्लोपे स्पष्टमेवानिष्टम् । वार्त्तिककारस्तु अधिकारफलानि बहूनि पेठुः ॥ ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसंज्ञार्थं यच्छयोश्च लुगर्थं वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे च प्रत्ययविधौ तत्सम्प्रत्ययार्थमिति । एतच्च सर्वं प्रकारान्तरेणापि सुसाधम् । तथा हि । स्वादिविधेः संख्याकर्मादित्रार्क्यैरेकवाक्यतया कर्माणि यद्वर्त्तते तस्मादित्यादिक्रमेण प्रकृत्याक्षेपादङ्गभपदसंज्ञाः सिद्धाः । कंसीयपरशव्ययोरपि अवयवस्य भवन् लुक् यच्छयोरेव भविष्यति न तूप्रत्ययसप्रत्यययोः । उगवादिभ्यो यत् प्राक् क्रीताच्छ इतिवत् कमेः सः आङ्परयोः खनिशृभ्यां डिच्चेति विधिवाक्यसत्त्वे ऽपि उणादयोऽव्युत्पन्नानीत्याश्रयणात् । उणाद्यन्ताः क्वचिद् व्युत्पत्तिकार्यं न लभन्ते इति तदर्थः । एतच्चातः कृकमीति सूत्रे कमिग्रहणेन सिद्धे ऽपि कंसग्रहणाज्ज्

रभूते चर्मणि वाच्ये प्राणिरजतादिभ्योऽञ् । द्वीपिनष्टिलोपः वदन्तात्प्रकृतसूत्रेण पुनरञ् । द्वैपो रथः । वैयाघ्रः ।

कौमारापूर्ववचने ॥ १३ ॥

कुमार्या अण् निपात्यते अपूर्वतायां द्योत्यायाम् । कौमारेति स्त्रीपुंससाधारणप्रातिपदिकमात्रनिर्देशादुभयत्रापि प्रत्ययः । अपूर्वत्वं तु पाणिग्रहणविषयकं तदुभयत्र स्त्रिया एवेत्यादि सर्वं निपातनाल्लभ्यते। अन्येनापरिणीतां कुमारीं परिणीतवान् कौमारः पतिः। द्वितीयासमर्थादुपयन्तरि प्रत्ययः। कुमारी या पतिं लब्धवती सापि भवत्येव। सूत्रारम्भे कृतेऽपि तस्य दुर्वारत्वात्। एवं तावत्कौमारः पतिरिति सिद्धम् । स्त्रियां तु पुंयोगलक्षणो ङीष् प्रत्यासत्त्या च यत्प्रयुक्तोऽस्य कौमारव्यपदेशः सैव कुमारी न तु स्त्र्यन्तरम् । एतच्च सूत्रारम्भेऽप्यावश्यकम् । पुंयोगङीषा प्रयोगातिप्रसक्तेस्तुल्यत्वादिति दिक् ।

तत्रोद्धृतममत्रेभ्यः ॥ १४ ॥

सप्तम्यन्तात्पात्रवाचिन उद्धृतमित्यर्थेऽण् स्यात् । शरावे उद्धृत ओदनः शारावः। मालिकः। कार्परः। शरावादावुद्धृत्य निहित इत्यर्थः। सूत्रे ह्युद्धरतिरुद्धरणपूर्वके निधाने वर्त्तते । अत एव सप्तमीसमर्थविभक्तिः सङ्गच्छते । भुक्तोच्छिष्ट इत्यर्थ इति वृत्तिकाराः । अवशिष्ट इति तदर्थः । तथाच कल्पसूत्रेषु व्यवहारः उच्छिनष्टि न सर्वं जुहोतीति । अत्रैवोद्धरणशब्दोपि प्रसिद्धः बाहुलकात्कर्मणि भूते ल्युट् । सास्मिन्पौर्णमासीत्यतः प्राक् तत्रेत्यनुवर्तते । तेन सप्तम्यन्तादेव प्रत्ययः ।

स्थण्डिलाच्छयितरि व्रते ॥ १५ ॥